No. ६६८ - घ

Title निरालम्बोपनिषद्

Author

Extent ३ Age

Subject उपनिषत् . सम्पूर्णम्

नं० ६६८ - च

निरालम्बोपनिषत् (उपनिषत)

पत्राणि ३ (सम्पूर्णम्)

नं० ५६७ - च

३ पत्रे

नं० ६६८-घ

निरालम्बोपनिषद (उपनिषत)

पत्राणि ३ (त्रीणि) (सम्पूर्णा)

श्रीगणेशाय नमः॥ अथ निरालंबोपनिषत्प्रारंभः॥ ॐ सहनाववतु० शांतिः शांतिः शांतिः
ॐ० इमू॥ नमः शिवाय गुरवे सच्चिदानंदमूर्तये॥ निष्प्रपंचाय शांताय निरालंबाय तेजसे
१॥ निरालंब समाश्रित्य सालंबं विजहाति यः॥ स संन्यासी च योगी च कैवल्यं पदमश्नु
ते॥२॥ एषामज्ञानजीवानां समस्तारिष्टशांतये॥ यद्यद्बोद्धव्यमखिलं समाशंक्य ब्रवी
म्यतः॥३॥ ॐ० किं ब्रह्म१ किं शबलं२ क ईश्वरः३ को जीवः४ का प्रकृतिः५ कः परमात्मा६ के
ब्रह्माद्याः७ का जातिः८ किं कर्म९ किमकर्म१० किं तपः११ किमासुरं१२ किं ज्ञानं१३ कि
मज्ञानं१४॥ कः संसारः१५ को बंधः१६ को मोक्षः१७ किं सुखं१८ किं दुःखं१९ कः स्वर्गः
२० को नरकः२१ किं परमं पदं२२ क उपास्यः२३ को विद्वान्२४ को मूढः२५ कः संन्यासी
२६ किं ग्राह्यं२७ किमग्राह्यं२७ किमग्राह्यं२८ कः समाधिः२९ इत्याशंक्याह॥ ब्रह्मेति
च अखिलोपाधिविनिर्मुक्तमनाद्यंतं शुद्धं शांतं निर्गुणं

निरवयवंनित्यानंदमखंडैकरसमद्वितियंचैतन्यंब्रह्मशक्तिशबलंब्रह्मेति॰अव्यक्तान्महद
हंकारपृथिव्यापस्तेजोवाय्वाकाशात्मकत्वेनबृहद्रूपेणांडकोशेनकर्मज्ञानार्थरूप लं बो
।निरा तयाभासमानंसकलशक्त्युपबृंहितंशबलंब्रह्म॰२कईश्वरइति॰एतल्लक्षणंब्रह्म
ऐवस्वप्रकृतिनिशात्यभिलेशमात्रिसत्वोकान्तर्ध्यांतर्यामित्वेनप्रविश्यब्रह्मादीनांबुध्यादी
३। द्रियनियंतृत्वादीश्वरः॰३कोजीवइति॰ब्रह्माविष्णुविश्वेशेंद्रादीनांधाराहमित्यध्यासवशा
च्छरीरोदेहसोयमेकोपिदेहोहंभेदवशादंशावहवोजीवाः॥४॥काप्रकृतिरिति॥ब्रह्मणःस ३
काशान्नानाविधजगद्विचित्रनिर्माणसामर्थ्यबुद्धिरूपाब्रह्मशक्तिरेवप्रकृतिः॥५॥कः
परमात्मेति॥देहादेःपरत्वाद्ब्रह्मैवपरमात्मा॥६॥कोब्रह्माद्याइति॥सब्रह्मसशिवसेंद्रःसोक्षरः
सविष्णुःसरुद्रःसमरुतःससूर्यःसचंद्रमाःससुराःसोप्यसुराःसमनुष्याःसपिशा
चाःसजीवाःसस्त्रियःसपश्वादयाःसब्राह्मणादयःसएवसर्वमिदंब्रह्मनेहनाना

स्तिकिंचन॥७॥का जातिरिति॥ चर्मरक्तवसामांसमज्जास्थीनीद्युकानि च जातिरात्मनो जातिव्यव
हारोपि कल्पितः ८॥ किं कर्मेति॥ इंद्रियैः क्रियमाणैर्नाहं करोमि कल्पितमीसध्यात्मनिष्ठत
या तत्तत्कर्मैव कर्म॥९॥ किं कर्मेति॥ कर्तृत्वभोक्तृताहंकारतया बंधः स्वरूपं जन्मातिकारणं नि
त्यनैमित्तिकयागादिव्रततपोदानेषु फलानुसंधानं यत्तदकर्म॥१०॥ किं तप इति॥ ब्रह्म सत्यं ज
गन्मिथ्येत्यपरोक्षज्ञानात् क्षीणं ब्रह्माद्यैश्वर्याशात्संकल्पबीजसन्यासस्तपः॥११॥ किमासुरमि
ति॥ अत्युग्ररागद्वेषाहंकारोपेतं हिंसादंभाद्युक्तं तप आसुरं॥१२॥ किं ज्ञानमिति॥ एकादशेंद्रि
यनिग्रहेण सद्गुरूपासनया श्रवणमनननिदिध्यासेन दृक्दृश्यप्रकारं सर्वं निरस्य सर्वांतरस्थं घ
टपटादिविकारपदार्थेषु चैतन्यं विना न किंचिदस्तीति साक्षात्कारानुभवो ज्ञानं॥१३॥ किं
ज्ञानमिति॥ रज्जुसर्पज्ञानमिवाद्वितीये सर्वानुस्यूते सर्वमये ब्रह्मणि देवतिर्यङ्नरस्थावरस्त्रीपु

रूपवर्णाश्रमबंधमोक्षादिनानातकल्पितज्ञानमज्ञानं॥१४॥कः संसार इति॥अनाद्यविद्यावास
नयाजातोहं मृतोहं मित्यादि षड्भावविकारः संसारः॥१५॥को बंध इति॥पितृमातृसहोदराप
सगृहारामादिक्षेत्रादिसंसारावरणसंकल्पो बंधः कामादिसंकल्पः कर्तृत्वाद्यहंकारशंकालवि
2 आभवगुणसंशयादिसंकल्पो देवमनुष्यादिरूपनानाकर्मयज्ञव्रततप[illegible]नैर्दोनानाकल्पसं
2 कल्पयमाद्यष्टांगयोगाभ्याससंकल्प आणिमाद्यैश्वर्यादिसिद्धिसंकल्पः केवलमोक्षासं
कल्पः संकल्पमात्रं बंधः॥१६॥को मोक्ष इति॥नित्यानित्यवस्तुविचारादनित्यसंसारसम 2
स्तसंकल्पक्षयो मोक्षः॥१७॥किं सुखमिति॥सच्चिदानंदरूपतयाज्ञात्वाऽनंदावस्था मोक्ष
सुखं सुखं॥१८॥किं दुःखमिति॥अनात्मरूपविषयसंकल्प एव दुःखः॥१९॥कः स्वर्ग इति॥
सत्संगः स्वर्गः॥२०॥को नरक इति॥असत्संसारविषयजनसंसर्ग एव नरकः॥२१॥किं परमं पदमिति
घ्राणेंद्रियांतःकरणादेः परतरं सच्चिदानंदमद्वितीयं सर्वसाक्षिणं सर्वगतं नित्यमुक्तं ब्र

स्वस्वरूपं परमं पदं॥२२॥क उपास्य इति॥सर्वशरीरस्थचैतन्यब्रह्मप्रापको गुरुरुपास्यः॥२३॥
को विद्वानिति॥सर्वांतरस्थं स्वचिद्रूपं परमात्मानं वेत्ति स विद्वान्॥२४॥को मूढ इति॥कर्तृत्व
भोक्तृत्वाद्यहंकारभावनामूढो मूढः॥२५॥कः सन्यासीति॥स्वस्वरूपावस्थायी सर्वकर्मफल
त्यागी सन्यासी॥२६॥किं ग्राह्यमिति॥देशकालवस्तुपरिच्छेदरहितं वस्तु ग्राह्यं॥२७॥किमग्रा
ह्यमिति॥स्वस्वरूपव्यतिरिक्तं मायामयं मनोबुद्धींद्रियगोचरं जगत्सत्यत्वचिंतनमग्राह्यं॥२८॥
कः समाधिरिति॥सर्वमन्यत्परित्यज्य निर्ममो निरहंकारो मत्वा ब्रह्मनिष्ठं शरणमधिगम्य तत्
त्वमस्यादि महावाक्यार्थं निश्चित्य निर्विकल्पसमाधिना स्वतंत्रः सन् यश्चरति स मुक्तः
स पूज्यः स परमहंसः सोवधूतः स ब्राह्मणः स सत्यसंधः स सर्ववित् सर्व एव ब्राह्मण इति
॥२९॥को वा ब्राह्मण इति॥ब्रह्मवित् सर्व एव ब्राह्मण इति॥निरालंबोपनिषदं योधीते स

ब्रह्मभूत्वा न पुनरावर्तनेन पुनरावर्तते इति॥ इत्युपनिषत्॥ यच्चैतन्यमनुस्यूतं जाग्रत्स्वप्नसुषुप्तिषु॥ तद्देवहं परं तत्त्वमितो नास्त्यधिकं परं॥ सह नाववतु॰ ॐ शांतिः३॥ निरालंबोपनिषद्॥ ॥ समाप्तः॥ ५॥५

३